नं० ४९०३

नाम – अनूपविवेकः

कर्त्ता – अनूपसिंहदेवः

पत्रसंख्या – १२० पत्राणि सं० ×

विषयः – तन्त्रम्

स्वरूपविवेकः

४५०३

3

[illegible] २३००
[illegible] १२२

५१०३
॥०
पूर्ण

ॐ श्रीगणेशाय नमः ॐ नमः सरस्वत्यै ॐ
सिंदूरारुणपरिष्कृतिमस्थभाले मत्तालिवृं
दपरिचुंबितगंडमाले शुंडाग्रपानविनिवा
रितविघ्नजाले वंदे गणेशमवनीधरसूनुका
बाले १ देयाद्वो मंगलानां ततिमनवरतं य
स्य दृष्टांतमात्र प्रादुर्भूतप्रभावाद्भवयति
भुवने विश्वयोनिः समस्तं क्षोणीभारं विधत्ते
शिरसि फणिपतिः शंभुरत्ति प्रपंचं सोयं विष्णुः
समस्तामरनिकरशिरोरत्ननीराजितांघ्रिः
२ गौरीमंत्रमुखारविंदमधुपो मालास्थिभू
षाधरः पाशाद्यैरखिलैरनन्यसमभैस्तैः स्फुरय
मानोऽस्मदं श्लाघातुरभूषितस्विन्नयनोद
न्ताधरं धमनो नंद्याद्यैः प्रमथैर्युतोऽस्तु भव
तां नैष्ठ्यामसदापूर्णेंदुः ३ त्वद्वंति त्रिदशेश्वर
स्य ललनाः विद्यंति नागाङ्गना लज्जंते च सम
मस्तदैत्यवनिताः सौंदर्यदर्पोज्ज्वलाः यत्स्त्री
कमलाकराङ्कविपुलप्रोत्फुल्लकल्पोरजि
ह्व्यालग्नरागारविंदयुगलं भूयात्सवोभूत
ये थ ४ यः प्रातर्ब्रह्मरूपो विसृजति भुवनं स्व
स्वकर्मानुषक्तं मध्याह्ने रुद्रमूर्तिः प्रलयर

श्री वि १

वज्ञनेमोहरूपंकरोति यस्मायंविस्वदेह
स्मिन्नगद्वनकृत्स्नर्यनारायणोसौ देया।
हौवाञ्छितानांनतिमनवरतंद्वादशात्मात्रि
मूर्त्तिः ५ हस्तादिविवब्रह्महरौमायाइदयंरवि
नैत्रम् यस्यहिसजयतिदेवोलक्ष्मीनारायणो
देवः ६ सजयतिवंशोभूमौप्रथमोवैवस्व।
तोयस्य .कवयोपियेनविहितंत्यजंतिमार्गेन
वाल्पमपि ७ सगरभगीरथभरतायस्मिन्वं
शेबभूवुरवनीशाः येषांकीर्त्तिंकथयतिसिं
धुर्गंगाचभारतंखंडं ८ तस्यान्वयस्यकिंवा
वर्णकंख्यातरूपस्य यस्मिन्पुराणपुरुषोरा
मेत्याख्यःस्वयंजज्ञे ९ यस्मिन्वंशेक्षत्रियाभू
मिपालाराष्ट्रास्येतिख्यातिमंतःपृथिव्यां
जातास्तस्मिन्सिंहसेनोबलिष्ठःश्रेष्ठोजज्ञे।
कान्यकुब्जावनीशः १० आस्थानराजःसंज
ज्ञेतस्मात्तद्वंशभूषणं पित्राद्दत्तंस्वकंराज्यं तं
त्यक्त्वायोनिरगाद्दूरान् ११ स्वबाहुबलद
र्पितोविविधयुद्धकर्मोद्धरस्त्वनेकनृपति
स्वयोन्नृपतिमंडलीमंडनः १२ तस्मिन्वंशे
तिविख्यातोयुद्धाख्योभूमिपोभवत् स्वना

न्यायेनविहितेत्वाजनेयोधधुरंधुरम् १३
तस्यात्मजोभूद्विविक्रमाख्यः श्रीविक्र
मादित्यइवातिविज्ञः पित्र्यंपदंतच्छ्रमि
वाववार्यराज्यास्पदेयेनकृतेद्विजांग।
लम् वीकानीरपुरीयेननिर्मितंनाभवि
विष्कृता तेपतिप्राप्ययानित्यंहसती
वामरावतीम् १४ श्रीलोककर्णस्तद
पत्यरत्नंजातोतिशूरोमहनीयकीर्तिः
दिवानिशंयोत्रवसत्कृतेपियस्यांग।
नैवजहातिलक्ष्मीः १५ तदात्मजः
श्रीजयसिंहदेवोबभूवभूमीपतिमा
ननीयः सापत्न्यभावंप्रविहाययस्मि
श्चक्रेनिवासंकमलाचगीश्च १६ तदं
गजन्मोप्यबभूवराजाकल्याणमल्लः
कमनीयकांतिः यस्यांघ्रिपद्मंकरदी
कृताश्चसामंतभूपानजहुःकदापि १७
तस्यात्मजोभूद्विययसिंहः प्रत्यर्थि
भूपालकरींद्रसिंहः पित्र्यंपदंप्राप्य
भ॰ ययोनृपाः सर्वेकृतानिर्गतसत्वरू।
वृं॰ वि॰ पाः १८ तस्याभवद्राजकचक्रवर्तीश्री
२

सूरसिंहोतिबलःप्रतापी नेभूमिपालाः
प्रणमंति सर्वेयथाहिसूरंमनुजास्तिमि
स्रम् २० तस्माच्छ्रीकर्णभूपः क्षितिपति
तिलकः सूरतोसौयथाप्राक्तद्वच्छ्रीसूर
सिंहावनिपतितिवर्हे मानतीयोबभूव
दृष्टेयस्मिन्मदीयेगलतिहिशपतःश्री
स्वजालेरिपूणांकष्टंविदग्धकवीनांसप
दि विगलतेनीविकाकामिनीनाम् २१
कर्णःकथंसाम्यमयंप्रयातप्राचीनका
र्णेनकथास्थकेन अपार्थयानेवनदी
पशक्तिः सदैवसंग्रामजयेनदीया २२
तस्माच्छ्रीकर्णभूपात्सुरपतिसदृशात्का
मरूपः स्वरूपोराजाश्रीविक्रमेवौसम
जनिविषयेजांगलेनूपसिंहः क्षोणी
नाथेहियस्मिन्नृपतिविषयेकोपिना
भूदरिद्रोनोपापीनैवदुःखीनचकिम
पिसत्ताद्वेषकृन्नैवमूढः २३ निर्जलो
पिसकोदेशोदानवारिप्रवर्षणैः विद्व
षायेनविहितः स्वनामसदृशः क्षितौ २४
कीर्तिर्यदीयागंगेवख्यातालोकत्रयेह

ठात् आदित्यवन्मनोपि पिंतेदमीभासय
त्यलम् २५ सभांतिभासयनोनित्यं पंडि
३ तैः सह संगतिम् ऊर्वीणामनदोचवींना धी
नाशास्त्रसमुद्भवाम् २६ तस्य राज्ञस्सभा
स्थाने भवत्कोलाहलो महान् पंडितंमन्य
विप्राणां विदुषां च परस्परम् २७ एकस्मिं
दा न्दिवसे जातस्त्व कलहे नकः तेषां वि
वदमानानां ज्ञानाज्ञानसुशालिनाम् २८
सालग्रामशिलामूर्तिलक्षणानोपवकर
यक् अन्यान्येरिहानानां बुद्धिवैषम्य
हेतवे २९ तेन राज्ञा मतिमता सालग्राम
परीक्षणे ग्रन्थोनूपविवेकाख्यः कौतु
केन विरच्यते ३० इह हि यथाधिकारं यज्ञा
नुष्ठानं नैमित्तिक कृच्छ्र शाद्याद्यनुष्ठा
नं च तदनुष्ठानाशक्तानामल्पायासे
नैव सालग्रामाधिष्ठितविष्णुपूजनमाहा
णाच तुर्वर्ग प्राप्तिमिच्छूनां ब्रह्मणादीना
मुपकाराय परमः कारुणिको वेदशास्त्रोक्त
श्र. कर्मानुष्ठानकोविदः श्री महाराजाधिरा
सू. वि. २ जः श्रन्नपसिंहदेवः प्रजाधिष्ठान सालग्रा

मलक्षणप्रतिपादकमनूपविवेकाख्ये
ग्रंथसमारभते ननुलक्षणंनामलक्ष्ये
साधारणधर्मकथनं असाधारणत्वे
लक्षणावच्छेदकनियतवृत्तित्वं एवं
सतिसालग्रामलक्षणेवक्ष्यमाणस्य च
लक्ष्यज्ञानमेतत्संभवात्तत्रलक्ष्ये किं
चक्रवनमालादिके नहिशिष्टाशिला
वालक्ष्यामुड्डाशिलावा नाद्यः अष्टेति
ष्टामितत्रैवगिरिद्रूपेणनित्यदात्तास्मि।
शिलाःसमस्तास्तामनत्यद्रूपानसंशयः
पूजनीयाःप्रयत्नेनकिंपुनस्त्वक्रलां।
छिताः गंडकीसंभवाश्चीनःस्पृशदे।
विवचोमम सालग्रामशिलारूपस्त।
वगर्भगतःसदेत्यादिविरोधात् एते
नद्वितीयोपिपक्षोनिरस्तः तस्मात्तस्याः
तथाः मुड्डाशिलासालग्रामपदवाच्या
भवति तत्रचक्रादीनांकिंपुनस्त्वक्र।
लांछिताइतिपूर्वोक्तवाक्यंगंडकी।
तत्प्रत्पन्नशिलासमसालग्रामपदंवाच्यं
तस्यसर्वेजीजनीनत्वात्तन्नलक्षणेष्ठ।

नार्थवानुपयोग इति चेन्न सत्यं यथा कौ
स्तुभादिनयः प्रभावाद्भगवतो नारायण
स्यरामांशेनैव नासामुद्रे जन्मनस्संवा
शेन तथा गंडक्या उदरे किं तेन स्यात्।
योतिशयवशादनेन रूपस्यापि भगवतो
नारायणस्य संवांशेनैव शिलारूपेणाज
न्म भवति तत्र शिलाया एकरूपत्वान्नस्या
नेकरूपत्वं प्रजकैर्ज्ञातुमशक्यमिति तद
धिष्ठितचक्रभेदात्स्वर्णभेदात्संस्थानविष
यभेदाद्वज्रपंजरवनमालांकुशपद्मशे
षवामनप्रकलादिभेदान्नानात्वरूपं ना
रायणस्यैवं वा ह्यपलक्षणकरणोपयो
ग इति तन्न तेषामपि पुराणादिषु प्रसि
द्धत्वाद्ग्रंथकरणानर्थकं तदवस्थमिति
चेत् तेषां पुराणभेदेन भेदसत्त्वेन लक्ष्य
मूर्तीनां विलक्षणाद्योष्टवा अवस्थितो
वा विकल्प उत्तमस्याप्यनुकल्पोपि हि पुराण
यसंहार इति यथा न्यायेन निर्णयार्थोयम
स्येतेरात ग्रंथकरण प्रयोजनरूप उपयोग
इत्येतेषां विकल्पानामुदाहरणादि मात्र

श्रु.
सू. वि.
५

णाग्रदर्पणेते ॥ ग्रासे ॥ दीर्घोवकाच
वर्णोथबिंदुत्रयविभूषिता मत्स्याख्यो
सौशिलाज्ञेयाभुक्तिमुक्तिफलप्रदेति
विल्वरहस्ये मत्स्यरूपंचदेवस्यदीर्घा।
कारंसभूषितम् बिंदुत्रयसमायुक्तं।
कस्यवर्णैसशोभनमिति पाद्मेत्रयो।
मत्स्यादयः श्यामाद्विचक्राः स्वेकसं।
युताः तेषांसंदर्शनादेवसर्वान्कामा
नवाप्नुयादिति ग्रासोउदीर्घहारयुताः
स्निग्धाहारमध्येद्विचक्रयुक् वक्त्रमेकं
पुच्छभागेदक्षिणांशसकृतिः वामेग्र
दर्पणेरेखामत्स्यमूर्तिः शुभप्रदेति।
पुराणेष्वेकस्याएकमत्स्यमूर्तेरेता
निमललक्षणानिकृतानि नत्वेकस्यां।
मत्स्यमूर्तौसंचक्रचक्रादिविरोधान्न
चक्रबोधकवाक्येननिश्चक्रायामत्स्य
मूर्तित्वेनिराकृतमेवविपरीतमित्ये।
वंपरस्परंबाधः अथवाकेश्चिच्चिह्नैश्च
क्रानिश्चक्रामत्स्यमूर्तिस्तथाद्विक्रापि
तथात्रिचक्रापीत्येवंविकल्पः अथवा

वह्लविरूपत्वान्मनुष्योल्पविरूपत्वान्नक
ल्पेस्येवं मनुष्योन्नकल्पः अथवा विवक्षा
पायानि चिह्नानि तिष्ठंति तत्र यातिरिक्ता
नां चिह्नानामन्यवाक्येभ्य उपसंहार इति
अथैतेषां पदानां मध्ये को वा पद उपा
देय इति समयेन निर्णीते तदुपजीव्या
वेन किंचिन्नावदाहृ स्मृत्यधिकरणे
मेव ब्राह्मणानां वेदव्यतिरिक्तानां स्मृ
त्युपस्मृतिपुराणोपपुराणकल्पसू
त्रादिग्रन्थानां स्वातंत्र्येण न प्रामाण्यम्
किंतु श्रुतिमूलत्वेनैव प्रतिपाद्य
होलाकाधिकरणे वेदव्यतिरिक्तानां
पूर्वोक्तग्रन्थानां होलाकाद्याचाराणां च
प्रतिशाखं प्रतिदेशं व्यवस्थापकप्र
माणमुपादव्यवस्थिते प्रमाणमिति
स्थिते शाखान्तराधिकरणे सर्वशाखा
प्रत्ययमग्निहोत्रादिकमेव कर्म तत्क
र्तृदानस्याधिकरणेष्वेकशाखागत।
ग्र॰ वृ॰ वि॰ ५ स्यैकस्मिन्नेवाग्निहोत्रादिरूपे कर्मणि।
सर्वशाखागताग्निहोत्रप्रकरणगता

ग्निहोत्रप्रकरणगताखिलाङ्गोपसंहारः
प्रयोजनम् कात्यायनर्षिस्तामाह वेदान
धीत्य वेदौ वा वेदं वापि यथाक्रमम् । अ
विप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेदि
ति याज्ञवल्क्यान्मुख्ये वेदाध्ययने प्राप्ते
स्वाध्यायोध्येतव्य इत्यध्ययनविधेस्तु ।
स्वस्य पितृपितामहादिभिः प्राधान्येन
धीतो वेदः विद्याध्यायस्तस्याध्ययने प्रा
प्तमेवेत्युभयोर्विरोधे प्राप्ते स्वाध्यायवि
ध्याध्ययनमात्रं विहितं नेतरयोर्वेदयो ।
स्त्विराकृते याज्ञवल्क्यवाक्यादेव स्वा
ध्यायस्याध्ययने सति स्वाध्यायविधिः
किं प्रयोजनं तत्र स्वशाखां यः परित्यज्य
स्वशाखोविधिनाद्विजः स्वशाखोक्तेन ।
विधिनेत्यादिवाक्यैः कस्यांचिदेकस्यां शा ।
खायां स्वत्वमपेक्षितं वेदाध्ययनांगभूतमु
पनयनमाश्वलायनादिप्रणीतगृह्याणां
मध्ये स्वगृह्योक्तेन विधिनेति वाक्याया
दकृतशाखीयसूत्रोक्तेन विधिना कृतेन त
स्योपवशाखायामष्टवर्षब्राह्मणमुपन

6

तत्तमध्यापयेनेतिवाक्यादध्ययनं पूर्वं।
भवतिश्राधानांगभूतकालवशादेवप्र
धानभूतेश्राधानेब्राह्मणादीनांनियम
स्यदृष्टत्वात्तेनोक्तवक्ष्यमाणीयेन पूर्वमुप
नयनपूर्वकमृक्छाखाध्ययनंकर्तव्यं।
मेवमेवमितरयोरपिद्रष्टव्यं एतत्स्वशा
खेसिद्धेएकस्यैवपुरुषस्यसर्वशाखाध्य
यनोक्तशाखागताःसर्वेपिधर्माःप्राप्ताः
एवमितरशाखीययोरपितत्स्वशाखानै
नावान्विशेषः यदापूर्वं स्वशाखाध्ययने
कृतेनतदानन्तरंवाक्यानामर्थज्ञा
पकत्वेनास्येतशास्त्रमाएपतत्समानार्थ
कानांशाखांतरगतवाक्यानांतत्प्रेक्ष्यवद
ज्ञानार्थज्ञापकत्वेनानुवादकत्वं स्वशाखा
याम्नातानांशाखांतरोम्नातानांवा।
क्यानांनुस्वशाखाम्नातवाक्यवदज्ञाना
र्थज्ञापकत्वेनपूर्ववत्प्रामाण्यंभवति।
यत्रस्वपरशाखाम्नातवाक्यवदज्ञानार्थ
ज्ञापकत्वेनपूर्ववत्प्रामाण्यंभवति यत्र
स्वपरशाखाम्नातवाक्ययोरेकार्थयोरे।

ग्रं
वृ॰ वि॰
६

ग्निहोत्राङ्गोदितानुदितकालप्रतिपाद।
कयोर्विरोधे स्वत्रविकल्पः सचासंतानवि
रोधिमायेन तच्छाखीयपुरुषपरत्वेनव्य
वस्थितः अयंसर्वोपिवैदिकोन्यायस्तन्मू
लभूतस्मृतिपुराणेष्वादर्तव्यः तन्मूलक
त्वात्तेषां परंतुस्मृतिपुराणानांस्वशाखो
क्तगृह्यवत्स्वपुराणमितिव्यवहाराभावा
त्पूर्वोक्तहोलाकाद्यधिकरणन्यायेनप्रति
शाखंव्यवस्थाभावात्सर्वेषांभवतित्येवं।
सिद्धेपूर्वोक्तपदार्थानांमध्येनाद्यपक्षोरमणी
यः परस्परंबाधेनपूर्वंमूर्तेरेवाभावप्रसंगा
त्बोधकशास्त्राणांसर्वथानिर्विषयत्वेना
प्रामाण्यप्रसंगाच्चनचद्वितीयोपितन्म
नोरूपपक्षोबाधस्यागतत्वादवस्थानात् स्मृति
द्वैधंतुयत्रस्यात्तत्रधर्मावुभौस्मृतौ स्मृतिद्वैध
त्वविषयः कल्पनीयः पृथक्पृथक् अन्या
यस्तत्वस्मरणविरोधाच्च द्वितीयतृतीयप
क्षयोरेकार्थत्वादुभाभ्यामेकः पक्षः यथा
ब्रह्माण्डपुराणे एकस्मिन्नेववदनेचतुर्वक्त्रो
त्रुटप्रभः चापबाणांकपाशांकुशध्वजचामरसं

धृतः वनमालाधरो देवः सीतारामः प्रकी
र्तितः सर्वसौभाग्यदः प्रोक्तः सर्वत्रविजय
प्रदः तत्रैव द्वारहृदये च तस्यैको वामतश्चे
कचक्रवान् बाणतूणीरचापाढ्यः सीता।
रामः स्मृत इति अत्रैकद्वारे द्वारहृदये चै
कस्यापि च सीतारामः मूर्तेस्य तत्पश्चकत्वे क।
थिते सत्यपि तयोर्विरुद्धचिह्नयो रूपसंस्थान
संभवादेकत्र गणपठितत्वेनापि तदसंभ।
वाच्छागत्यां तस्यां विकल्पे प्राप्ते तस्यैकत्वनि
राकृतत्वे नैकद्वारे च तत्पश्चकमूर्तेर्वैकुण्ठत्वे
न बहुफलदातृत्वेन च मुख्यत्वे प्राप्त उक्तलाञ्छ
नाः सर्वे यस्यामेकत्र संस्थिताः सर्वत्र सर्वदा
पूज्या मुख्या ते सर्वे वैधनैरित्यादिवक्ष्यमाण
वैखानससंहितायां तस्यास्तस्या मुख्यायाः
इष्टकाशास्त्रमताः सर्वमुख्यसंयोगेति प्राश
स्त्यमिद्धत्वात् द्वारहृदये च तत्पश्चकमूर्तेस्तु।
नद्विपरीतत्वेनानकल्पत्वेऽपि क्वचिदयं पक्षो।
प्यादर्तव्यः यथा तत्पश्चके लक्षणादौ एवं
मुख्यानुकल्पत्वेन गुणोपसंहारेण विशिष्ट
प्र· वृ·वि· ७ लक्षणत्वेन च तत्तन्मूर्तिलक्षणे तत्तन्मूर्तिल

क्षणप्रकरणेव्यक्तीभविष्यतितस्मान्मुख्यो
नुकल्पत्वेनोपसंहारत्वेनवायथान्यायंसा
लग्रामस्तल्लक्षणप्रतिपादनेकेनापिप्रायः।
पूर्वंनकृतमितितत्प्रतिपादनार्थोयमसं
तार्थवानग्रोगइति ननुसालग्रामस्यैव
पूजनेकोनिर्बंधः सूर्योग्निर्ब्राह्मणोगा।
वोवैष्णवंविमरुज्जलम् पूजात्मासर्वभू।
तानिभद्रपूजापदानिमेइत्यादिभागवती
यवचनेनपूजायाःस्थानांतराणामप्यु
क्तत्वादितिचेन्न कर्तव्यमसततंभक्त्यासा
लग्रामशिलार्चनमिति देवर्षेकिंबहूक्ते
नशृणुमेनिश्चितंवचः सालग्रामशिला
नित्यंपूजनीयासदाद्विजैरिति सालग्रा
मशिलांवापिचक्रांकितशिलांतथा ब्रा
ह्मणःपूजयेन्नित्यमित्यादिस्कंदपुराण।
पुराणसंग्रहविष्णुधर्मोत्तरादिवचोभिःसा
लग्रामस्यैवनित्यपूजाविषयत्वात् साल
ग्रामशिलापूजानित्येतिबहवःकाम्येतिके
चित् नित्यकाम्येतिसंप्रदायिकाः तस्या
नित्यत्वेप्रमाणमाहस्कंदे कर्तव्यमसततंभ

ज्ञा सालग्रामशिलार्चनमिति पुराणसंग्र
हेनारदंप्रतिब्रह्मणोवचनम् देवर्षेकिंव
हूक्तेनशृणुमेनिश्चितंवचः सालग्राम।
शिलानित्यंपूजनीयासदाद्विजैः सालग्रा
मशिलापूजांविनायोऽश्नातिमानवः सचं
डालादिविष्टायामाकल्पंजायतेकृमि।
रिति होमाद्रौदेवलः सालग्रामंहरेश्चि।
ह्नंप्रत्यहंपूजयेन्नरइति तदकरणेप्राय
श्चित्तमुक्तंवाह्नेमाद्रौगौतमः यदिविप्रः
समुत्सृज्यसालग्रामशिलार्चनम् सयाति
नरकंघोरंयावदाचंद्रतारकं नस्यपापवि
शुद्ध्यर्थंप्रायश्चित्तमुदाहृतम् ब्रह्मकूर्चं
वरेत्तत्रदिनैकस्मिन्द्विजोत्तम मासत्यागे
पर्णकृच्छ्रंवर्षत्वौडंवरंचरेत् सालग्रामो
यत्रनास्तियत्रवैवामृतोऽथवा श्मशानस।
दृशंगेहंसविप्रःपङ्क्तिदूषकइत्यादिवचन
संदोहवर्णनान्नित्यत्वं अप्रत्ययोलभतेऽत्रसा
लग्रामप्रपूजनादित्यादिफलश्रवणा।
च्चकाम्यत्वं एवंसत्येकस्यादुभयत्वंसंयोग
पृथक्त्वादिसमग्निहोत्रंजुहोतीत्युत्पन्नस्यक

प्र॰ वृ॰ वि॰ २

मेणोयावज्जीवमग्निहोत्रंजुहुयात्स्वर्गकाम
इत्यादिवदेकस्यैवसालग्रामप्रपूजनस्य
नित्यकाम्योभयवाक्योभयसंयोगान्नित्य
काम्यत्वमेवयुक्तमितिस्माप्रतीमः त
त्रापिकाम्यप्रयोगेननित्यप्रयोगस्यसिद्धिरि
त्येतस्यापिन्यायसिद्धत्वात्पृथग्नित्यस्या
प्रयोगइतिकाम्यनित्यप्रयोगयोर्विहित
कालेनुष्ठीयमानत्वेनतस्मिन्कालेविहि
तकाम्यप्रयोगेणजीवनाच्छिन्नेश्रा।
गतेविहितकालेनित्यान्तस्यापिजानता
दिति अत्रसालग्रामएवनारायणत्वे
नपूजनीयः उततदधिष्ठितोविष्णुर्वा
तत्र द्विविधंभगवद्रूपंचलंवाचलमेव।
च चलंसन्यासिनोरूपमचलंप्रतिमादि
कं नह्यम्मयानितीर्थानिनदेवामृच्छि
लामयाः तेपुनन्त्युरुकालेनदर्शनादे
वसाधवइत्यादिब्रह्मपुराणभागवता
दिपुराणवचोभ्यःसालग्रामएवविष्णु।
त्वेनपूजनीयइतिकेचिदाहुः तत्राप्य
योहृदयेसूर्येस्थंडिलेप्रतिमासुच ए

जनीयो हि भगवान् यथा सूर्योग्निर्ब्राह्मणो
गाव इत्यादि मद्भक्तपूजापदानि मे इत्येतन भा
गवतादि विरोधात् नस्तु भयविषयवाक्यव
त्वाद्विकल्पोस्ति इति चेन्न न तस्यादृष्टदोष
दुष्टत्वादुपासकभावनाव्यभिचाराच्च किं
चोक्तं वर्ण्यधिकरणन्यायेन स्तुतिस्तत्सोवि
रोधे स्तुतेर्बलीयस्त्वान्न यथा स्तुतिः सत्या
त्वभ्रमे ब्रह्मणः परस्यापरस्य प्रविशेषवि
स्मो नैकोनेकायनं नैकतरमनेनेति स्तु।
त्यानावदर्थोपि स्थितेन पूर्वविस्मनोर्चैत्सुकं।
तथाप स्तुतिः अर्चत प्रार्चत प्रियमेधासो
वेत अर्चत पुत्रका उत पुरत्रयस्मर्चतेति
अस्यार्थः हे प्रियमेधासः सम्यग्ज्ञानिनः
स्थूलप्रतिमापूजकाः अर्चत प्रार्चत प्र।
कर्षेणार्चत आदरे वीप्सा हे पुत्रका बा
लकाः अल्पज्ञानिनः लघुप्रतिमापूज
काः यूयमप्यर्चत प्रकर्षेणार्चत पूजय।
त अत्र को वार्चनीय इत्यपेक्षायामाह
पुरं नेति पुरं प्रतिमामाविल्पत्वे न न पूज
नीया किंतु धृष्णा धर्षणशीलं नेजः पर

श्र·
वृ· वि·
५

मात्मा व्यमर्चनेनेति तस्माद्दर्चायिष्ठैनएव
विष्णुनार्चनेतिस्तव्यक्तमिति नन्वगारिष्ठ
वैक्तभागवतवचनवल्लात्माधवएवर
र्शनमात्रेणचेत्युनेनेति नहिसालग्रामा
र्चीनामेवपूजाविधानेकिंमर्थमितिचेद
त्त तथेतिसामान्यमुत्तरं वस्तुतस्तुर्वै
क्तवाक्यात्तेषांदर्शनमेवकेवलंयाचिता
र्थेनान्यथेमिति अर्चादिपूजनेनतिम
पूजासिद्ध्यर्थंयाचितार्थफलार्थंचेत्या
धिकविषयमितितदेवाभ्यर्हितमिति
तत्रद्विजानीनांपंचायतनपूजायाति
त्यत्वमुक्तं तस्याएवाकरणेप्रत्यवायश्च
तत्कथंभवतासालग्रामशिलायाएवपू
जनेनित्यत्वमुक्तमितिचेत्त श्रृणुसर्वत्र
पुराणादौगणपत्यादिमूर्तिभ्रुगणपा
त्यादीनामेवपूजनत्वमुक्तंनान्यदेवता
नां अत्रतुसालग्रामशिलायांसर्वदे
वपूजाविधानान्नकोपिदोषइति तदु
क्तंब्रह्माण्डपुराणे सालग्रामशिलायांत
म्दष्ट्याः सर्वदेवताइति सोमशंभुरपि

सालग्रामशिलायां तत्तदुद्यासमर्चनेदि
ति अथवा पञ्चायतने गणपत्यादितत
त्पञ्चायतनमूर्तिनां पूज्याधिष्ठानविधा
नात्समर्थ्यं सालग्रामस्यैव प्राप्तिस्तथा
पि पञ्चायतनांतर्गतविष्ण्वधिष्ठानत्वेन।
सालग्रामस्यैव प्राधान्यात्तत्कार्यत्वोपपत्तिः
एवं च स्मृतिपुराणादिभिस्त्रिभिर्वचनैः साल
ग्रामपूजनं नित्यत्वेन नैमित्तिकत्वेन काम्य
त्वेन च पूजनीयमिति सिद्धम्। ननु अधि
कारिफलयोरेव प्रतिपाद्यं च वक्तव्यम्। स
त्वाप्रारभ्यते येषः करोतीशो महत्फ।
लेभिः [illegible] काम्यत्राधिकारिविष
यप्रयोजनानीति चेदुच्यते स्मृतिस्म
तिपुराणादिप्रवर्तनात्सदृष्टनरभक्ति
युक्तः पुमानधिकारी श्रीलक्ष्मीनाराय
णप्रीत्यावाप्तिस्तत्फलं स्वर्गादिसर्व
कामिस्वर्गं नत्फलं सालग्रामादिलक्ष
णप्रतिपाद्यमिति अथ लोके नैर्विवि
धाकारैर्लाञ्छितं यत्स्वरूपं ते चक्राङ्कि
तं हरेश्चापि सालग्रामस्य लक्षणं यथा

ग्रं॰
पू॰ वि॰
१०

10

योगं विचार्यैव गृहीतं प्रयत्नेन इत्या
दिवचनैः सलक्षणानामेव सालग्राम
मूर्तीनां पूजाविधानात् वक्रचक्राश्च वा
यास्याङ्ग्रचक्रा सधोमखी पूजयेत्तो
प्रमादेन दुःखमेव लभेत ततः शेषाणा
हितानां प्रोक्तानां गृहीत्वा पूजयेदित्या
दिवचनेषु तेन लक्षणमूर्तीनां दुःखदात्वे
नेह यत्नात् सलक्षणसालग्राममूर्तीनां फ
लदातृत्वेन पूज्यत्वात् नतु कानि सलक्ष
णानि कानि दुर्लक्षणानीति जिज्ञासूनां
संदेहनिवारणाय सालग्रामलक्षणं
सूच्यते तत्र वाच्यस्य वाचकशब्दाधीन
त्वाद्वाचकशब्दः पूर्वं प्रथमं विचार्यते
ननु यत्संदिग्धं सत्प्रयोजनं तदेव प्र
तावन्तो प्रतिवीक्षितं भवतीति न्यायेन
सालग्रामशब्दस्यानादिसिद्धो संदिग्ध
एव किमर्थं विचार्यते इति चेत्सत्यम् पु
राणेतिहासभेदेन च तत्स्थाने करूपत्वे
न प्रतीयमानत्वात् तथाहि वाराहपुरा
णे मया देवप्रसादेन स्फुतं मे दारणे

नम् मंदारान्परमेस्थाने विस्मोतहकस
वेमीतिधरण्या पृष्टो वराहउवाच ॥
एतत्तेनमे देवि यन्मां त्वं परिपृच्छसि क
थयिष्यामि ते शुभं मालग्राममिति स्मृत
मित्युपक्रम्य मालग्रामतीर्थस्य तत्र वि।
धिध्यमानानां गंडक्यादिनदीनां सोमेश्व
रादिलिंगानां चोत्पत्ति प्रशंसा त्वका शुभ माले
कायनको मैनीदेवेन स्मिन्परे मम माल
ग्रामे महतीर्थमास्थितः परमं तपः इत्या
दिना कश्चित्मालेकायननामा मुनिः ।
मालग्रामतीर्थममाराहृपीविस्त।
र्धंग प्रसक्तवानितिपूर्वकथासंबंधः
ततः भगवन्देवदेवेश मालेकायनको मु
निः किंच कारतपः कुर्वेत्वदत्तेन्नेविस्म
कि देहतिपुनर्धरण्या पृष्टोथ वराहउ
वाच अथ दीर्घेण कालेन स ऋषिः सं।
शितव्रतः तप्यमानो यथान्यायमप।
प्रमत्तमुत्तमम् अभिन्नपरमश्चायं
विशालं पुष्पितं तथा मनोज्ञं सुभगं चै
व देवाम पितुर्लेभमम् अविज्ञानपरि।

श्रान्तः सालेकायनको ऽद्भुतम् अपश्य
त्तपुनस्सालेश्वभाक्तु भवनं परम् ततो
दृष्ट्वा महासालं परिश्रान्तो महामतिः
विश्राममकरोत्तत्र दृष्टकामो यमं मु।
नीः सालस्य तस्य पूर्वेणास्थितः पश्चा।
त्सखो मुनिः मायया मममूर्छान्माशक्तो
दृष्टेन मामभूत् ततः पूर्वेण पार्श्वेनोत
स्य सालस्य सुंदरि वैशाखमासद्वादश्यां
सदर्शनमुपागतः दृष्ट्वा मां तत्र सम्मति
स्तपस्वी संस्थितव्रतः तुष्टाव वैदिकैः सू
क्तैः प्रणम्य च पुनः पुनः ततो हृष्यमाणो
वै रूपेण मुख्येन सुंदरि प्राञ्जलं परमां प्री
तिं तमवोचमृषिं तदा साधु व्रत समस्ता
भाग सालेकायन सत्तम तपसानेन ते सं।
तुष्टः स्तुत्या चानया तव वरं वरय म।
द्यते हंसि हुस्तपसा भवान् एवमुक्तः।
सत्तमया सालेकायनको मुनिः सालव
दं समाश्रित्य तिष्ठते नांतरात्मना ततो
भाषनमांदे विसकृषिः संश्रितव्रतः त
वैवाराधना भीयन तपस्तप्तं मया हरे दृष्ट्वां

वचःसमाकर्ण्यतस्याभिलषितंवरम् द
त्त्वाभिलषितंदेविसमवोचंवचोऽथतं ।
ग्रन्थस्यगुह्यंवक्ष्यामिमालेकायननन्द
न तवप्रीत्याप्रवक्ष्यामियेनैतल्लेत्रम
न्त्रमे मालयाममितिख्यातंतन्निवोध
मुनेऽद्भुतम् योयंवदत्तस्त्वयादृष्टःसोऽह
मेवनसंशयः एतत्कोपिनजानातिवि
नादेवंमहेश्वरम् माययाचनिगूढोऽहं
त्वत्प्रसादात्प्रकाशितम् एवंतस्यैववरंद
त्त्वामालेकायनकार्यवै पश्यतस्तस्यव
स्यैतत्रैवान्तर्हितोभवम् वृन्ददहिए
तःकृताञ्जगामस्वाश्रमंमुनिः ममता
द्रोवतस्यानेगिरिकूटशिलोच्चये मा
लयाममितिख्यातंभक्तसंसारमोचनमि
त्युपसंहृतमित्यनेनेतिहासेनायमर्थः
सर्वत्रमालेनवृन्दविशेषेणगम्यतेज्ञाय
तेपर्वतविशेषः समालयामगिरिस्तीर्थ
विशेषउक्तोभवति गमलृगतावित्या
स्माद्धातोः कर्तरिचकारकेसंज्ञया मि
तिचकर्मणिचन् एष्टोरगादिनाद्रफेव

श्री.
वृ.वि.
१२

ड्डौ च कृतार्थायाम् इति संपद्यते ननु
ष्ठायाद्वनामनेकार्थत्वादिहमेरपिता।
नार्थत्वं युक्तमेव धातूनामनेकार्थ।
त्वं च महाभाष्यकारेणोक्तम् वपिः
प्रवपने दृष्टे छेदनेपि वर्त्तत इति।
अत्र सालशब्दोदन्तादिः तालादिश्च
तत्रार्थः सलगतावित्यस्मादन्तादेर्धा
तोः सल्यते गम्यत इति कर्मणि घञ्।
वृड्डौ च सारशब्दाद्वा भूमनिंदाप्रसं।
सायां नित्ययोगे तिशायने संसर्गेस्ति
विवक्षायां भवति मतुबादय इति वार्त्ति
ककारवचनादतिशायनस्य विवक्षितत्वात्।
त्वयोरेकत्वस्मरणात्साल इति तथाच
शयमक्रसां पुंसि भूरुह्यमात्रेपि सालो
वरणे सर्जयोरिति सालः पादपमात्रे स्या
त्प्राकारे सर्जकद्रुम इति विश्वः सालोव
द्वांतरे दुर्गे इत्यनेकार्थः द्वितीयस्तु श
लगतावित्यस्माड्धातोः शालति वा प्रना
वलतीतिज्वलितिकसंतेभ्यो णइति।
णे कृते शाल इति सिद्ध्यति शालो हाल

13

उमे मत्स्यप्रभेदे सर्जपादपे इति विश्वः
एवं च दंत्यादिः शालग्रामादिस्थशालशब्दो
दुष्ट एत इति चेत् भवत्प्रमाणबलात्
घटकुंभशब्दवदुभयोर्वाचकत्वे किंनः
छिन्नमित्यत्र शालवृक्षोपशोभिताखि
लपर्वतविशेषस्यैव शालग्रामतीर्थत्वे
प्राप्ते तदुपसंहारमाह तत्रैव एतन्मे।
सर्वमाख्यातं देवेशसंवत्सरे सर्वस्मा।
क्षिप्रदं चैतन्देवेशं द्वादशयोजनम् सा
लग्रामस्वरूपेण मया यत्र स्वयं स्थितमि
ति एतत्क्षेत्रोद्भवाश्च सर्वा अपि शिलाः
पूजने प्रशस्ताः तथा चोक्तं वराहे महादे
वेन शालग्रामगिरौ विष्णुरहं सोमेश्वराभि।
इति तथा तत्रैव पूर्वं गंडकामहत्त्वप्रस्तावे
तत्र तपसा तुष्टो विष्णुर्वरं ब्रूहीति तामाह
ततो हिमांशोमा देवी गंडकी लोकतारिणी
प्रांजलिः प्रणता भूत्वा मधुरं वाक्यमब्रवी
त् यदि देव प्रसन्नोऽसि देयो मे वांछितो वरः
मम गर्भगतो भूत्वा विष्णो मत्पुत्रतां व्रज ।
ततः प्रसन्नो भगवांश्चिंतयामास मेदिति

श्रा॰
वृ॰ वि॰
१३

किंयाचितंनिम्नगयानित्यंमत्स्येनगलुभया
दास्यामिवांछितंयेनलोकानांभवमोक्षणं
इत्येवंकृपयादेवोनिश्चित्यमनसास्वयं
गंडकीमवदत्प्रीतःशृणुहेदेविवचोमम
मान्त्रयामशिलारूपीतवगर्भगतःसदा
स्थास्यामितवपुत्रत्वेभक्तानुग्रहकारणात्
अत्रापिपूर्वोक्तप्रकारेणधारणीयेयोरभे
दोपवाराच्छिलारूपंश्रीविष्णुरूकमि।
तिष्ठेयम् मत्स्यानिध्याननिषीनांत्वमतिश्रे
ष्टाभविष्यसि दर्शनात्स्पर्शनात्स्नानादा
नाच्चैवावगाहनात् हरिष्यसिमहापापं
वाङ्मनःकायकर्मजम् एवंदत्त्वावरंदे
वैतत्रैवांतरधीयत। ततःप्रभृतितिष्ठा
मिहैवास्मिन्स्थाललोछनः अद्यैवभगवा
विष्णुर्भक्तेच्छयातद्विग्रहः इति पद्मपु।
राणोक्तप्रकारान्तरेणोपाख्यानंश्रूयते न
प्यांकश्चिद्धैदशिरोनाममहात्मानिर्गंगा
तीरेतीव्रंतपश्चकार ततस्तत्तपसातीव
तोषितःशाक्रोमंजवानसंगभिधानांकोवि।
देवकन्यांतत्तपोविघ्नार्थंप्रेषितवान् ततः

सामहेंद्रप्रेषितोवेदशिरस्तपोविघ्नंकुर्वं।
तीक्रुद्धेनमुनिनात्वंजडरूपापतनात्कुटिलत्वाच्च
14 नदीभवेतिशप्तातीवदुःखिताकरुणतरैः
र्वचनैस्तंविज्ञापितवती तथाविज्ञापितोमु
निस्तामित्यवोचत् ततोवाचमुनिःशप्तांतोन
दीभूत्वाजनार्दनम् सालग्रामशिलारूपंवो
दरेधारयानवे तवयशःप्रसरेल्लोकेमुक्तिद
तिनृणामिह सैषावैमेन्नवाग्देवीगंडकी।
सरितांवरा तस्यांविष्णुःशिलामूर्तिर्वरदा
शापाद्भूद्भवेहेति ध्रुवकेशप्रतिपमवचनं
श्रीविष्णोरपिवृंदाशापोयथाजाततोनर्थ
पितत्रैवपद्मपुराणेद्रष्टव्यम् विष्णुपुराणे
विस्तरात्स्वकम् तस्मिन्क्षेत्रेहरोदेवोमन्त्ररू
पेणसंश्रुतः सालग्रामगिरौतस्मिन्शिलारू
पेणतिष्ठति अहंतिष्ठामितत्रैवगिरिरूपे।
णनित्यदा तस्मिन्शिलाःसमग्रास्तुमन्त्ररू
पात्संश्रयः पूजनीयाःप्रयत्नेनकिंपुनः
श्चक्रलांछिताइतिवाराहपोषाढदसमापणे
श्रं. पाख्यानाख्व तथाचवराहे गुह्यानितत्रचा
वृवि. ख्यातिनीर्थानिदशपंचच तथापिकेविला
१४

न्तिमच्छंतेयेरिह्वस्थिताः तत्रबलिप्रदेना
मनुष्येदेवेममप्रियमिस्तुपक्रम्य चक्रा
स्वामीतिविख्यातेतस्मिन्देवेपरंमम च
क्रांकिताः शिलातत्रदृष्यंतममचप्रियाः
तदेतत्स्थेत्रेवसर्वेसमंतयोजनत्रयमिति
अत्रगंडकीनदीजलमध्येस्थिताश्चक्रलां
छिताः सर्वेअपिसालग्रामशिलाः प्रशा
स्तताः तत्रसालग्रामशिलास्वरूपेण
श्रीविष्णोर्विद्यमानत्वादित्यास्ताम् इति
समस्तसामंतचक्रचूडामणिमरीचिनी
राजितपादपीठश्रीमन्महाराजाधिराज
श्रीमदनूपसिंहदेवविरचितेनृपविवे
केउपोद्धातनृपः प्रथमउल्लासः १
अथ मुद्रादेवैपरीमाणमासनेमूर्ति
भेदकम् स्थूलसूक्ष्मविभेदेचचक्रल
क्षणमेवच सम्यग्विचार्यमतिमान्सामा
न्यलक्षणंतथा पूजयन्मुक्तितोनित्यं
यथोक्तफलभाग्भवेदितःकाउकासा
लग्रामपरीक्षोपयोगिमुद्रादिकंविविच्य
लिख्यते तत्रमुद्रातत्ववैखानससंहितायो

15

ब्रह्मोवाच भगवन्देवदेवेश शंखचक्रगदाधर
संशयं मे समुद्भूतं छेत्तुमर्हसि मे विभो साल
ग्रामस्य यत्पुण्यं देवैस्त्रैलोक्यविश्रुतम् तत्रा
पि च हरिस्साक्षात्सर्वदैवैः समन्वितः तत्रा
प्यत्र शिला विष्णोः सूक्ष्माः सूक्ष्मतरास्तथा
प्रादुर्भावैश्च विविधैराकारैश्च समन्विताः
सर्वार्थाः कामदाः प्रोक्ता भोगमोक्षप्रदास्त
था शालग्रामशिलाश्च तथा येन तदाख्यातुमर्ह
सि श्रीभगवानुवाच शृणु ब्रह्मन्प्रवक्ष्या
मि सालग्रामगिरिर्हरिः यस्माद्धरिः स्थित
स्तत्र प्रादुर्भावैरनेकशः लक्षणैर्विवि
धाकारैर्लाञ्छितैश्चैव दृश्यते शैले सूक्ष्म
सूक्ष्मैर्वा मद्रूपपरिकीर्तिता एकपद्मा
कृता यात्तद्दक्षिणावर्तसंयुता च तल्लाञ्छ
नसंयुक्ता भोगमोक्षफलप्रदा पद्मे यस्यां
स्थिते द्वे ताभ्यां च संवृते स्थिते केनापि ला
ञ्छनैश्चक्रावर्तवर्गफलप्रदा लाञ्छनेन।
स्यादौ सर्वत्रशक्तस्य धारः चक्रेणाङ्कृता।
या च पद्मेन गदयाङ्किता तत्र श्रीः प्रसन्नेति
ष्ठेत्सदा संपत्तथाविशेषात् केतुः शंखः लो

शा॰
बु॰ वि॰
१५

ष्ठुनेनविनायास्यादप्रपात्तात्तमास्मृता
चक्रंवाकेवलेपद्मेलांछनमथवागदा
लाञ्छनेवनमालावाहरिलेखासमन्वि
तः तस्मिन्नोहेनदारिद्र्यंनशोकोनरणा
द्भयं नचैवाग्निभयंतत्रयत्रैतद्दृष्टेनवा।
ध्याते ध्येनेमोक्षोभयंतस्यपूजनादेवा।
नित्यशः केवलेपद्मसंयुक्तायासावैकुं
ठउच्यते घोणाकृतिर्वराहाख्योवतलां
छनसंयुता चक्रेणदृश्यतेलिंगंतदातत्र
सुशोभना वराहमूर्तिसंयुक्तासर्वकाम।
फलप्रदा दयान्त्सामोन्नहेसिद्धिंवत्सव
र्गेणपूजिता वनमालान्नवैयस्याःसा।
त्रसूत्रकमंडलः कपिलाख्याभवेद्वरा
यनेश्वर्यप्रदायिका दर्शनात्स्पर्शनेपा
पंत्रसहस्तंव्यपोहति सान्निध्यान्मंत्र।
पूर्वेणपूजनेनफलाधिका स्थूलवि।
ड्डांकितापाचक्रलिशेनसमन्वितः वैन
नेयाभवेन्मुद्रालक्ष्मीस्वसमन्विताः
मात्स्याख्यापरामुद्राचतुर्वर्गफलप्रदा
मीनादिमूर्तिसंयुक्तासर्वकामार्थसंप्रदं

पद्मासनस्था सा मुद्रा सर्वकामप्रदा शुभा
एकैकेनैव चिह्नेन लांछिता तेन शास्यते
अस्याकृतिस्तथा मुद्रा सा त्वमालासपद्मा।
16 का पद्मांकिता भवेन्मुद्रा हयग्रीवेति स्मृता
भयङ्कः खोनैर्मुक्तो नरः पापात्प्रमुच्यते
अहं चैव भवेन्नस्य लस्याये श्वर्यमन्त्रमम्
प्रागुक्तालांछनाः सर्वे यस्यामेकत्र संस्थि
ताः सर्वत्र सर्वदा पूज्या मुच्यते सर्वबंधनै
रिति पुराणसंग्रहेपि ॥ मत्स्याख्या कू।
र्मसंयुक्ता कूर्माख्या मत्स्यसंयुता दृश्या
त्मा मोहसंसिद्धिब्रह्मचर्येण पूजिता ने
त्रे संमीलिते यस्मात्स्वहृत्स्वेकमंडलः
कपिलाख्या भवेन्मुद्रा धनैश्वर्यप्रदायि
का स्थूलचिह्नमुत्वे यस्याः कुलिशेन समा
प्तं वैननेया भवेन्मुद्रा लांछिनेश्व सलां
छिता पूजिता न भवेन्मुद्रां भुक्तिमुक्तिफ
लप्रदेति प्रयोगपारिजातेपि पांचजन्यां
कितायान्तु पद्मेन गदया चैविना तत्र श्रीः
प्रत्यहं तिष्ठेत्सदा संपदमाविशेत् पांच
जन्या शंखैः जयाख्या प्रमामुद्रा चतवैर्मो

श्र॰
कु॰ वि॰
१६

फलप्रदा येषांचैकेनचिह्नेनलांछिता
स्तेवदृश्यते इतिमुद्राख्येलक्षणम्
अथदेवाख्येलक्षणमुच्यते ॥ ब्रह्मांड
पुराणेनारदंप्रतिब्रह्मा देवेनहिविधं।
प्रोक्तंमूर्तितोवर्णतस्तथा चिह्नलक्षण
तश्चेतिविज्ञानमथविचक्षणैः वामना
मूर्तेनतस्याङ्कीधराणांचवामनम् दे
वेवाराहमूर्तेस्तुश्रीधरंठखिलप्रदम्
हयग्रीवस्यवाराहस्तुलसीदेवमथापिवा
देवंनारायणंज्ञेयमन्येषांक्रमतस्त्वथेति
कपिलेनारसिंहेनवामनेनविसितप्रभम्
दामोदरंतुनीलाभमनिरुद्धंतथैवच श्या
मनारायणंदेवंकमलवर्णंतुवैस्तवम् व
सुवर्णमनंतेचश्रीधरेपीतमुच्यतेइति
नारसिंहपुराणेपि वासुदेवंसितंज्ञेयंर
क्तंसंकर्षणंतथा दामोदरंतुनीलाभम
निरुद्धंतथैवच श्यामेनारायणंदेवमेवं
चमुनिपुंगवेति पुराणसंग्रहेपि वासु
देवंसितंविद्याद्रक्तंसंकर्षणंतथा श्याम
कपिलंनारसिंहस्यवामनस्यासितप्रभम्

17

वामदेवंसितंज्ञेयंपंकजेसंकर्षणंस्मृतम्
दामोदरंतुनीलाभमनिरुद्धंतथैवच
षपामेनारायणंप्रोक्तंकृष्णवर्णंतुवैष्णवं
वङ्कुवर्णमनंतंस्यापीतंश्रीधरमुच्यते ।
लक्षणंनरयोगेनतत्तल्लेखमुदाहृतम्
इतिदेवाख्येलक्षणे अथपरिमाणाख्ये
लक्षणमुच्यते मूर्त्तिपरिमाणमित्यर्थः ।
हेमाद्रौपुराणसंग्रहे वृत्तस्त्र्याष्टमोभा
गउत्तमेचक्रलक्षणम् मध्यमेतुचतुर्भा
गंकनीयस्तुत्रिभागकमिति अस्यार्थः ।
सालग्रामदेवंसूत्रेणसंवेष्टितेनतद्वृत्तस
त्र्याष्टमांशेनचेत्सालग्राममूर्त्तिर्भवेत्तदात
उत्तमम् यदिचतुर्भागमितंतदामध्य
म यदित्रीयांशसमंनतदाधममित्युत्तमम
ध्यमाधमत्वेविचार्यंशास्त्रमित्यर्थः एतत्फ
लमपिस्कंदपुराणउक्तम् उत्तमंसुभवेद ।
प्रोक्तंत्रचवर्गनिर्दितंभवेत् मध्यमेनामस
दृशंफलंदक्षिप्रकीर्तितमिति नामसदृश
शमितिदामोदरनारसिंहादिषुमध्येयत्रा ।
प्र·
बृ·वि· मपारीतत्फलदायीकेवलंतन्मात्रलक्षणे
१२

त्कफलोत्कृष्टेति इतिपरिमाणाख्यंल
क्षणम् अथासनाख्यंलक्षणमुच्यते न
ह्यासनेचलत्वविधम् चलस्थिरविषमपा
र्श्वभेदात् नड्डकेस्कंधपुराणे आसने
चचलेपीस्याच्चलेवाचलमेवच विषमे
पार्श्वकेचैवसालग्रामशिलागतमिति
फलमपितत्रैवोक्तं अचलेतुस्थिराल।
क्ष्मीश्चलेतस्थानभंगदम् दुःखप्रदंत
विषमेपार्श्वेचोद्वेगदंस्मृतं आसनेच।
विचार्यैवयासंलक्षणकोविदैरित्यासना
ख्यंलक्षणम् अथमूर्तिभेदाख्यंलक्ष
णमुच्यते सर्वोपिसालग्राममशिलाम्
र्तयोद्विविधाजलस्थलजभेदात् नडुकंध
स्कपुराणे मूर्तयोद्विविधाज्ञेयाजल।
जाःस्थलजास्तथा जलजाःकोमलाःस्नि
ग्धाःस्थलजाःपुरुषरःस्मृताः फलमप्ये
तयोस्तत्रैवोक्तम् तेयस्तेष्टिदाःस्निग्धामो
क्षदाःपुरुषाःस्मृताः इतिमूर्तिभेदाख्यं
लक्षणं अथशिलायाःस्थूलसूक्ष्माख्यं
लक्षणमुच्यते पूर्वोक्तलक्षणलक्षितास।

सालग्रामशिलामूर्तिषु सूक्ष्मा एव मूर्तयः
सूक्ष्माधिकाः प्रशस्ततरा नाश्च पूजनीयाः
तथा चोक्तं पद्मपुराणे सालग्रामलक्षणे
18 तरं यथा एतल्लक्षणसंयुक्ता मूर्तयः फ
लदाः स्मृताः याश्च तास्वपि सूक्ष्माः सूक्ष्मा
प्रशस्ततरास्मृता यथा यथा शिलासूक्ष्म्य
महत्पुण्यं तथा तथा तस्मात्तां पूजयेन्नि
त्यं धर्मकामार्थसिद्धये तत्राप्यामलकी
तुल्यासूक्ष्मा चातीव या तथा तस्यामेव स
दा श्रीः सन्निधाय सह वसाम्यहमिति अति
स्थूला तु या मूर्तिर्गृहस्थस्तां न पूजयेदि
ति निषेधात्स्थूलमूर्तिपूजने वक्ष्यमाणा
रीत्यासति संभवे निषिद्धमिति ज्ञेयं इति
स्थूलसूक्ष्माख्यं लक्षणं अथ शिलायाश्च
क्राख्यं लक्षणमुच्यते वैखानससंहिता
यां नारद उवाच समाचक्ष्व परं रूपं चक्रा
णां लक्षणं मुने सर्वसिद्धिकरं चैव सर्व
कामार्थसाधकं वैखानस उवाच दिव्यं
श्री· वर्षसहस्रं तु हरिराराधितो मया ततस्तु
पू·वि· वाच भगवान्विष्णुस्त्रिभुवनेश्वरः वं रक्ष
२२

लीप्रीतोस्मि तपमानवसुव्रत इत्याक।
र्ण्य मया देवो विज्ञप्तो भुवनेश्वरः सा
त्वया समस्मद्भक्ता चक्राणां लक्षणं प्रभो
कथयस्व प्रसादेन यदि तुष्टोसि माधव
तस्य श्रुत्वा वचो मह्यं स्मयमानोब्रवीद्धि
दं विस्मरुगाच लक्षणं यस्य चक्राणां
तच्छृणुष्व महामुने धर्मकामार्थमोक्षा
णां पुरुषार्थैकहेतुके केचिल्लांछनसं।
युक्ताः शंखोकारेण संस्थिताः केचिल्लिं
गसमोपेता केचिच्चक्रेण संयुताः दशयो
जनविस्तीर्णे मम देवे हि जोत्तम उत्तरे
चैव दिग्भागे प्रमाणं योजनेन तथा मान।
नामा पर्वतस्तच चक्रनामोक्तिना नदी वि।
स्तनामा संशोक्तो धानि मम स्वरूपाणि सर्वतः
त्रिकाले शिवश्चक्रू रक्षापसरोगणसेवितः
शैलमूर्तिरहं तत्र चक्राख्ये नवये विदुः।
षोडशोपचारैर्मंत्रैर्वसंविधायव गं
धैर्विविधश्चैव संस्तूय मधुसूदनम्।
भोजनेच बलिं दत्वा चक्रेष्वासं हरिरेति म
त्स्योक्तिनाश्वयेचक्राग्राग्र्यांः प्रदिदानणां

19

सदाप्रद्युम्नरूपेणस्थितस्तत्रहरिकेश
वः कूर्मीकिताख्येचक्रामहासंततिं।
कारकाः महार्थकारकाविद्याह्वरिस्त
त्रैवावस्थितः वराहमूर्तिसंयुक्तेयत्रच
क्रेप्रदृश्यते प्रजनालभनेराज्यंपृथि।
व्यामेकराजकं नरसिंहाकिकेचक्रेउ
लेमंभविमानैर्वः पत्तैरित्यपैः शत्रू।
णांनाशनंतत्रहृषीकेशाश्रेपरिकीर्तितं स्त
भनेपरसैन्यस्यमहामत्स्यहरंपरं श्रेकि
तेवामनेतस्याश्चक्रेपरमशोभने नाना
रत्नकरंचैवसत्त्वत्रयकरंभवेत् चक्र
मध्येतद्रूपेणजामदग्न्यस्वरूपके तत्र
त्वाम्नेकिनेचक्रेजामदग्न्यप्रकीर्तितं।
गरुडवाराणे गंडकीश्चोत्तरेतीरेगिरिरा
जस्यदक्षिणे देवेन्द्रविश्वसानिसंध्या
त्संवेदेत्रोत्तमोत्तमे योजनद्वादशमितं
चक्रतीर्थसमाकुले तत्रचक्रनदीनाम
तीर्थंब्रह्मविनिर्मितं तस्योत्तरेमहाक्षेत्रे
ममप्रीतिकरस्तथा तत्रकायाभिगताप्त्वः
पाषाणाश्चाविगेश्वराः सचिह्नाःश्चिह्निताश्चे

प्र॰
वृ॰ हि॰
२४

वतारो धरणीतले नराणामपि पद्मयोद्भ।
किंचित्कालनिवासिनां सर्वासिद्धभवे।
चक्रं मल्लके दृष्टपवच एवं तेत्र समहा।
त्म्यं मृगपद्मादयस्तथा चक्रनयन्नरेती
रेलभंते पुण्यमत्तमं सालग्रामशिलास
नानाम्मूर्त्तिसमन्विताः पूजनीयाः प्रय।
त्नेन चतुर्वर्गफलाप्तये हिरण्यवज्रकी
टेन निर्मितं चक्रमुत्तमं पठ पद्मादिभि
टेन तत्वानेकविधं स्मृतमिति धर्मसं।
हितायां हिरण्यगर्भो भगवानाद्योनार
यणः स्वयं वज्रकीटः प्रभूत्वा च वचारख
मुधातले सौवर्णो भ्रमरं दृष्ट्वा देवा स्वरूप
धारिणः उपतस्थुर्महात्मानं भ्रमंतम
तितेजसं षडंघ्रिभिर्जगत्सर्वं व्याप्तमेत
च्चराचरं हिरण्यगर्भं भ्रमरै भ्रांमितं भ्रांत
वत्सदा दृष्ट्वा जगत्पतिं विस्मिं वैनतेयं
सनातनं रुरोध शैलरूपेण जगतां हि
तकारकं निरुद्धवेगः सहसा प्रविवेश।
बिलं महत् तस्मिन्प्रविष्टे भ्रमरास्तहि
लेविविशुः सुभं चक्रुः स्वं स्वं मंक्के देश

कोशकारवदात्मनः नास्तिकानां प्रत्यया
र्थं वज्रकीटाच्छुत्थः चक्राकारं विनिर्मा
णं तत्र कुर्वन्हि सर्वशः जलस्थले मठं चै
20 व तच्चक्रं त्रिविधं स्मृतं निष्केसरं कीटभ्रा
न्तं च चक्रं मठसंज्ञकं इदमेव द्विधा प्रोक्तं
जलस्थलविभेदतः एवं चक्रं द्विधा प्रोक्तं
तत्रापि जलजं वरं क्रमादिमानि चक्राणि
द्विजातीनां खगाधिप पूजायां सुप्रशस्ता
नि मासाणि द्विजसत्तमैः इति विशेषस्त
वराहपुराणे वराह उवाच शिलायां ल
क्षणं सम्यक्काया प्रोक्तं सुविस्तरं वसुदे
वामथो वक्ष्ये चक्राणां लक्षणं शृणु पट
केसरभेदेन चक्रं तद्द्विविधं भवेत् स्निग्धैः
सूक्ष्मैः केसरैर्युक्तं तत्केसरं भवेत् तद्धी
नं मठचक्रं स्यान्नदीकाकृतिकं च यत् पृ
थ्वीकेसरं चक्रं मठचक्राद्विशिष्यते अ
त्रास्तिकारणं यच्च तन्नैः सम्प्रगायते रहस्य
स्यं शिक्षि-लायां तु संभूते कीटकशतैः
प्रीत्या तस्मात्प्रजायेत चक्रं तत्केसरोद्भवं
तद्धीनं यदि संभूते तस्मादुत्पद्यते चक्रं।

अ.
श. वि.
२.

मरसंज्ञं फलाल्पदम् चक्राभ्यां च शिलाशे
पाशाल्लाशल्लाव संभ्वरे यत्नोक्ते द्विविधं च
क्रं तत्तु नदि विधं भवेत् जलजं प्रीत्याचे
गेन कीटकः स्थलजं चैव लक्षणं तस्य क
थ्यते सलिलगं दीप्तिसंयुक्तं चक्रं तज्जलजं
भवेत् कर्कशं हीनतेजो यच्चक्रं स्थल।
जं भवेत् एतयोर्जलजं प्राशस्त्येन दीपवे।
तयोगतः मध्यमं स्थलजं चक्रं पर्वतस्थं च
योगतः पद्माकारं कविचक्रं शिलायाजा
यते धरे समासेन मया प्रोक्तं चक्राणां ल।
क्षणं प्रिये सम्यग्विचार्य सुधियाग्राह्यं स
म्यगर्थमादरादिति एवं जलस्थलकेस
रमठपद्मभेदेन पंचप्रकाराणि चक्रा।
णि भवति एतद्व्यतिरिक्ते शवचक्रगा।
दाप्यत्येवं यच्चक्रं तन्नाग्र धप्रायपठि
तमुक्तं चक्रातिरिक्तं रेखातिमितं ज्ञेयं न
प्रसिद्धचक्रवर्तं दव्यतिरिक्तं चक्रांतरं भ
वतीति निष्कर्षः इति चक्रार्थलक्षणं
अथ सालग्रामसामान्यलक्षणमुच्यते
वराहे चक्रसंख्यानं यत्रास्ति वर्णोक्तिं वा

स्त्रियश्चैव छिद्रंकार्यंचविज्ञेयंनतन्त्रव
संधौरे स्कंधछाले दीरेवान्तेऽलेखापिशा
लिग्रामंनिवेशयेत् इत्थाधिक्येनयोः किं
विह्नहाणीयाङ्कद्विमान्तरइतिसामान्यल
क्षणं नतत्वस्समानोष्ठविशेषतन्मूर्ति
लक्षणेषुदेवाकारवर्णशंखचक्रगदाप
द्मवनमालाकौस्तुभकल्पद्रुमसवर्णाविं
दुरेखादियथासंभवंअस्तैः किंयद्भिस्सम
स्तैर्वाचिह्नैस्तन्मूर्तिलक्षणानांनिर्णय
स्यसिद्धत्वात् मृद्धोदेवप्रमाणंचयासने
मूर्तिभेदके स्थूलसूक्ष्मविभेदंचचक्रल
क्षणमेवच सालग्रामेशिलायास्तुसा
मान्यंलक्षणंतथा सम्यग्विचार्यमति
मान्सालग्रामंप्रपूजयेदिति मूर्तिवि
शेषमनपेक्ष्यसामान्यलक्षणानांकुत्रोप
योगइतिचेत् शृणु तत्रतावन्मुद्रायाः
प्रयोजनमाह वनमालानिवेषस्यास्याः
स्वकमंडलः कपिलाख्याभवेन्मुद्राय
नैश्वर्यप्रदायिका तथा स्थूलविन्दौकि
नायाचक्रालिशेनसमन्विता वैनतेयाभ

षं
वृ·वि·
२१

वैन्मद्वादशलक्षणैश्चसमन्विताः साङ्गपाङ्गो
पणमुद्राचतुर्वर्गफलप्रदेत्यादिसर्वेवास
पर्यालोचनयादार्शपौर्णमासिकप्रण।
यनाग्निनगोदोहनस्यपशुलाभार्थंवन
नलक्षणलक्षितविशेषमूर्तिपूजनाग्नि
न्यतन्नन्मद्वादशलक्षणगुणानांतन्नह्यको।
पात्रफलार्थत्वमेनावान्विशेषः दृष्टांते
फलाभावेसतिनित्यत्वेनचसमाधानाद्वगो
दोहनस्यप्रणयनेप्राप्तिः एकतेत्रफला
भावेसतिमुद्रासद्भावेप्राशस्त्यंतदाभावे
गहानिरिति अथदेवलक्षणप्रयोजन
माह तच्चत्रिविधंप्रोक्तंमूर्तितोवर्णत
स्तथा मिश्रंलक्षणतश्चेतित्रिविधंभव
तिप्रिये तत्रमूर्तितःदेवगुणस्य वाम
नेनप्रतंयस्मात्क्रीधराणांचवामनम्।
देवेवाराहमूर्तेस्तन्नीधरंतदखिलप्रदमि
तिवाक्याद्दोदोहनवदखिलफलार्थत्वं
ग्रतिक्रोधोवर्द्धलक्ष्मवामनःपरिकीर्ति
तइतिनित्यदेवस्यविद्यमानत्वात् मि।
श्रदेवस्यचात्रप्रयोजनं यथहृणफला

यद्येवं शालग्रामेतन्नक्षत्रमाणसामान्यगुणविशि
ष्टमितिज्ञेयमितिवर्णतः प्रयोजनेनवनकव
र्णमूर्तौ वर्णविशेषविधानार्थं तथाहि वर्त
लेस्थूलमसंतेस्पष्टचक्रसमन्विते स्थूलमा
नतमश्चैवादीर्घास्यमतिगह्वरं स्फुरद्वेला
वलिप्रतेनाभिमत्स्योननाभवेत् चक्रस्यो
भयपार्श्वेतत्सूक्ष्मीप्रख्याकृतिर्भवेत् केशा
भारंतुवैनार्शदस्यते चक्रपार्श्वेनरतिगरु
डोकनरसिंहमूर्तौ नरसिंहोमहादेवः श्व
वद्यास्यदंष्ट्रकः ब्रह्मचर्येणपूज्योसौनाम
थाप्तजितोभवेदिति संग्रहोक्तनरसिंहमूर्तौ
ववर्णविधानाभावेसमानियमेनवर्णग्रह
णप्राप्तेकपिलेनारसिंहेतवामनेतसि
तप्रभमितिसामान्यवाक्योक्तकपिलगुण
ठविधानार्थेनचनरसिंहःपीतस्तुमहावक्रे
सुखेपुरुरितितन्मूर्तिलक्षणप्रकरणगत
वर्णविशेषप्राप्त्यैनसामान्यवचनोक्तवर्ण
स्यप्राप्तिरितिवर्णं यतिसंपूजयेदेनंगृह
स्थपरिवर्जयेत् इतितस्ययतिविषयत्वेन
गृहस्थादीनांवर्णविशेषविधानाभावेत

प्र·
वृ·वि·
२२

स्यात्तद्विषयार्थत्वात् यत्रसामान्यविशेषयो।
क्तोभयत्रयोर्वर्णयोरेकत्वे तत्रसामान्यवाक्यो।
क्तगुणस्यविशेषवाक्यप्राप्तत्वेनानुवादक
त्वमेवमुक्तवक्ष्यमाणवर्णविधीनांप्र।
योजनंबोध्यं मूर्तिपरिमाणं १ आसन
२ मूर्तिभेद ३ स्थूलसूक्ष्म ४ देवत्र ५
चक्र ६ सामान्यलक्षणान्येषामपित
त्तन्मूर्तिलक्षणोक्तक्रमेणैवस्यात्क्रमस
तोयायमितित्यायात्सामान्यस्यैवविशे
षनिर्णयार्थत्वमितिध्येयं तथोक्तवक्ष्य
माणतत्तन्मूर्तिविशेषलक्षणेष्वपि
ति दिक् इतिश्रीमहाराजाधिराजश्रीमा
लग्रामसामान्यलक्षणप्रतिपादकोद्विती
यउल्लासः २ अथविशेषलक्षणप्रतिपा
दकस्तृतीयउल्लास आरभ्यते तत्रतावत्
स्थूलवक्त्रोभवेद्विघ्नमौलैकफलदोर्विनः
लक्ष्मीनारायणःश्रीमान्भुक्तिमुक्तिफल
प्रदः द्विवामनसंज्ञःस्याद्भोभूधान्यध
नप्रदः यःस्यात्संतानगोपालःपुत्रपौत्रा
दिवृद्धिदः इत्यादिवचनैर्विघ्नलक्ष्मीना।

रायणादृषिवामनसंतानगोपालादिविष
यमूर्तिनानानाविधफलदातृत्वेनतत्तत्का
मनायापूज्यत्वान्नानासौ वत्सस्थलेचकौस्तुभो
23 भवेदित्सरित्यादिवचनोक्तमूर्तिविशेषस्व
वकलक्षणैर्विनानहिशेषज्ञानाभावेनत
त्पूजनासिद्धिरित्येतदर्थंलक्षणान्युच्यते
तथैवोक्तंपुराणसंग्रहे अनेकामूर्तयःसं
तितल्लक्षणलक्षिताः तैर्लक्षणविशे
षेणज्ञातेशकाननाः कलौ वर्णरूपाय
वयवैः प्रमाणविलांछनैः द्वारदेश।
विभेदेनभेदः केषोविद्यतेइति वर्ण
तोयथापद्मपुराणे शुक्लादिवर्णसंयु।
क्तोद्विचक्रः पद्मसंभवः वासुदेवोजगद्यो
निःकल्मषः पीतांबरोगपः चक्रेद्वारस्थि।
तेज्ञेयः सौख्यैकफलदोर्चिनः चक्रेन्द्र।
मध्यदेशस्थेतेषामान्योन्तरंस्मृण पर
मेष्ठीतितक्तोथसत्यानारायणाद्वयः अ
नेनस्वेवविज्ञेयोनानामूर्तिस्वेवभवेत्।
श्र॰ राज्यंमस्तुधनंचैवनानिवैवांछितार्थकं।
वृ॰ वि॰ ददातिपूजितोलोकेतस्माद्धानार्चयेन्नरइति
२२

शङ्खादीन्यस्त्रादिशार्ङ्गेन रक्तकमलच्छविवर्णो
वज्रवर्णानित्यनारोवर्णाथासाः शङ्खोर
क्तस्तथा कमलोच्छविवर्णो वज्रवर्णो वानिति
वक्ष्यमाणविष्णुवचनात् पुराणसंग्रहे
वामदेवो जगद्योनिः कमलः पीताम्बरो व्या
यः वक्रपाणिरितीमे षड्द्वारचक्राः समी
रिताः अनिरुद्धो हरिः कमलो जामदग्न्य
स्तथैव च वामे वा दक्षिणे वापि पार्श्वे वक्र
समन्विताः लक्ष्मीनृसिंहो विष्णुश्च नरसिं
हश्च भीनिदः बलरामो भूवराहः सयज्ञो
वामचक्रवान् सयज्ञो यज्ञवाराहसहि
तश्चन्यथः अथ विशेषमूर्तिनाकृतिरिति
लक्षणज्ञानाद्दादावेकचक्रादिमूर्तयः
प्रदर्श्यन्ते पुराणसंग्रहे पुण्डरीकः प्रलं
बघ्नो वैकुण्ठो मधुसूदनः पीताम्बरो रामो
बलरामस्सुदर्शनो वीरनारायणश्चैव क्षी
राब्धिशायनस्तथा सीरपाणिस्तथाम
न्त्यः परमेष्ठी तथैव च समल्ली विष्वक्स्वरूप
श्चेत्येकचक्रा उमेमताः अन्येषां मध्ये के
षां विलक्षणं फलं चोक्तं पद्मपुराणे विष्णु

रुवाच नित्यमस्मिन्सदा ब्रह्मन्शालग्रामे
ऽद्वाश्मनि नेत्रैर्वर्णैश्चक्रादिभेदान्ना।
मानि मे शृणु एकोऽनेकस्तथा कृष्णो हि
वर्णो बहुवर्णो वान् एकचक्रस्य संज्ञा स्त
पंचज्ञेया यथाक्रमम् मोहं मत्स्यं तु विष्णुं द
चन्द्राद्यं मरटं तेन तथा रुद्रादि पूजितो नृ।
णां तस्मात्सदा नार्च्ययेन्नर इति । २ अथ द्वि
चक्रमूर्तयः पुराणसंग्रहे मत्स्यकूर्मौ व
राहश्च श्वेतवराहवामनौ लक्ष्मीवराहग
रुडौ वराहो धरणीधरः ततः नृसिंहः परशु
रामो वीररामश्च केशवः लक्ष्मीनृसिंहः
शेषश्चोपेन्द्रो दधिवामनः विस्पर्दी
शरथी रामो बलरामो हलायुधः रामा
विजयकोदंडहस्तश्च त्रिविक्रमः कृ
ष्णो गोवर्धनः कल्कीपद्मनाभो हरिस्त
था प्रद्युम्नश्चानिरुद्धश्च गोपालो लक्ष्मी
पूर्वकः तथा संतानमदनो गोपालः
श्रीधरस्तथा बालकृष्णो हयग्रीवो गोपा
म्र॰ लो वंशपूर्वकः मायानारायणश्चैव केव
सू॰ वि॰ लो गरुडध्वजः पुंडरीकाक्षपद्मश्च श्री।

श्रीधरश्च गदाधरः लक्ष्मीपतिर्वा
सुदेवो माधवः शेषशाय्यपि वि
दारणनृसिंहश्चनृसिंहोराक्षसान्त
कः आकाशकालकपीलयोग।
पालनृसिंहकाः विष्णुजिह्वोघोर।
रुद्रविभीषणनृसिंहकाः महार
रौद्रनृसिंहौद्वौविष्णुनामस्तथैव च।
कलिनाशकरामश्च रूपाकरणकुलो
तकः नरशेकरश्रवौद्वौ रूपनाराय
णस्तथा दामोदरो लक्ष्मीधरः श्च
श्रुद्ध हृषीकेशः सेकर्षणाधोक्षजौ
चरत्नाढ्यश्चचतुर्भुजौ त्रैलोक्यमोह
नः कृष्णः सौभाग्यवरदस्तथा रु।
क्मिणीविजयस्तद्वत्रमालाधरं
जयौ पारिजातहरः कृष्णः स्यमन्तक
हस्तथा कालेयमर्दनः श्रीकृष्णस्तद्व
चाणूरमर्दनः कृष्णः सनातनश्च
नः कृष्णो गोवर्धनस्तथा सुदर्शनो
मणिश्च वनमाली च योगराट् श्रम
ताहरणस्तद्वद्गोपाङ्गनस्तथैव च श्री

25

वत्सलोछुनस्तद्वद्वाणीधर एव च देव
देवो जगद्योनि स्वयंभूः कपिलस्तथा
धर्मराजो हरिर्हरो हेहयस्तद्वदेव च हि
रण्यगर्भस्तद्वद्ब्रह्माद्वेशाः परमपूर्वकः
द्विचक्रामूर्तयश्चैता नास्मा कल्पेन प्रकी।
र्तिताः २ त्रिचक्रास्त्वपि तन्त्रैव मूर्तयः
परिकीर्तिताः नारायणो हरिर्हयो लक्ष्मी
नारायणस्तथा तद्वद्दाशरथी रामः शा
न्ताख्यो वासुदेवकः हंसः कूर्मस्तु तश्चै
व केशवो वक्ररूपकः अधोमुखन्नृसिं
हस्त्वशिशुमारस्त्रिविक्रमः मत्स्यमू
र्तिः सीतेशः पुरुषोत्तम एव च त्रिच
क्रामूर्तयश्चैताः समासेन निरूपिताः
३ चतुश्चक्रास्त्वपि तन्त्रैव चतुश्चक्राह।
रिहयश्रीनारामजनार्दनाः त्रिविक्रमः
कंसमर्दी लक्ष्मीनारायणस्तथा वट
पत्रशशीरामो पुरुस्तद्वत्तर्भजः गो
वर्धनश्चैताश्चतुश्चक्रा भवंति हि ४
पंचचक्रमूर्तयो पि तन्त्रैव सीताराम।
हरिहयो पंचचक्रा विमोस्मृतो ५ य

श्र·
वृ·वि·
२५

ह्यचक्रास्तथैव श्रीमूर्तिस्तारकब्रह्मसी
नाराममिमूर्तिकः पुरुषोत्तमोथ
पश्चैवमधुसूदनएवच पद्माभि
रामः षट्चक्रामूर्तयः समुदीरिताः ६
सप्तचक्रास्थापितस्तथैव अनन्तः प्रथ
मोज्ञेयोनृसिंहः सर्वतोमुखः सप्त
चक्राविमौह्येतविज्ञेयो पूर्वसूरिभिः ७
अष्टचक्रास्तथैव महानारायणश्च
वचक्रपाणिपितामहो अनन्तस्तथैव
वाराहाष्टचक्राः समीरिताः ८ नव
चक्रमूर्तयस्तथैव विष्वक्सेनाह
यसर्वेनवचक्रासमीरिताः ९ दश
चक्रमूर्तयस्तथैव हृषीकेशश्चगो
विंदस्त्वनंतोविश्वरूपकः महाविष्ण
श्चपातालनृसिंहः पुरुषोत्तमः स
त्यवीरस्मृतेसर्वेदशचक्राः समीरिताः १०
अथैकादशचक्राः सुदर्शनोरुदच।
कोदण्डानन्तस्तथैवच ११ अथद्वाद
शचक्रमूर्तयस्तथैव ज्ञेयोद्वादशच
क्रस्तमकरंदः सूर्यएवच १२ अथयत्।

26

नरष्टचक्रादिषोडशचक्रान्तामूर्तयः
वसुचक्राद्यनन्तास्त्वनन्ताः पूर्वसंज्ञ।
काः अष्टचक्रादिषोडशचक्रान्ताः रु
द्रोक्तमहानारायणाद्यनन्तसंज्ञकाइ
त्यर्थः २३ अथचतुर्दशचक्रादिचतुर्वि
शतिचक्रान्तामूर्तयः चतुर्दशादिच
क्रैश्चयुक्ताविश्वंभरादिकाः अनन्ता।
स्तत्संख्यान्ताविज्ञेयाविबुधैः क्रमा
त्. २४ २४ अथपंचविंशतिचक्रादिर्यं
वत्संभवचक्रमूर्तयः यावत्संभवच
क्रांकस्तनोनंताविश्वडकाइति २५
निश्चक्राऽपिमूर्तयस्तत्रैव निर्वीलः
वद्धौनोज्ञेयोयोगीशोविश्वपंजरः स
द्योजातोवामदेवईशानश्चंद्रशेखरः
भवस्तत्पुरुषः शंभुशिवनाभिरघोरकं
ठउलिमश्चसर्वास्तनिश्चक्रामूर्तयोम
ताः एवंलक्षणसंपन्नाः शिलाश्चके
रलेकताः पूजनीयाविशेषेणसर्व।
शा॰ कामफलप्रदा इति अथविशेषल
वृ॰ वि॰ क्षणानिभुवनाद्यदशानांमूर्तीरन्
२६

क्रामति मत्स्याद्यादशानन्तैश्च संमिताः
केशवाद्यः अनंतस्तु भवेद्योगो विश्व
रूपस्ततोपरः वैकुंठस्तु ततः पश्चाद्धय
ग्रीववचनर्भजो गदाधरः पुंडरीकाक्षः
पुंडरीकसुदर्शनौ योगेश्वरस्तथावि
स्वपंचरूपयज्ञमूर्तिकः दत्तात्रेयः शिशु
मारो हंसः परमहंसकः लक्ष्मीपति।
रितिख्यातो गरुडध्वजपवच वटप।
त्रशायी च ततो विष्वक्सेनाभिधः पीतां
बरः सत्यवीरः श्रीवाचामृतहारकः नर
शेषो नगरुडो वनमाली ततः परम् म
गरिश्च मकुंदश्च ततः श्रीवत्सलांछनः
धरणीधरो योगराजः श्रीमूर्तिः श्रीम
हायकः देवदेवश्च कपिलोथयः ली
लाब्धिशाय्यपि मत्स्यलाञ्छधनामाचवक्र
पाणिस्ततः परम् बहुरूपी जगद्यो।
निस्त्रिमूर्तिश्च ततः परं विष्वक्सेनो हे
हयश्चैवता वै विश्वमूर्तयः सद्योजा
तो वामदेवो घोरस्तत्पुरुषस्तथा ईशा
नश्चावसक्तो ह्रीशंकरश्चंद्रशेखरः शिव

२७

नाभिर्धवः पश्चाद्गणेशास्त्वेकपर्वहि सू
र्यस्तथाङ्कुउलिङ्गः पञ्चायतनमूर्तयः
हरिर्हरो धर्मराजः परमेष्ठी पितामहः ।
हिरण्यगर्भः स्वयंभूश्चतुरस्रोतश्चतु।
र्मुखः एताः प्रकीर्णकशिलाः सालग्राम
समुद्भवाः उद्देशक्रमतस्तासां मध्येतल
क्षणानि च तथादौ मत्स्याद्यामूर्तय उच्यते
मत्स्यः कूर्मः सूकरो नारसिंहस्ततस्त्ववौ
भार्गवश्चाथ रामः रामः सीताप्राणनाथ
स्तथान्यो रामः प्रोक्तो रौहिणेयोपि बुद्धः
तथाककीतिविख्यातो रूपवतारो विभो
र्दशनारायणस्य क्रमतः कथ्यते लक्ष।
णान्यथ तथादौ मत्स्यमूर्तिलक्षणानि।
ब्रह्माण्डपुराणे दीर्घद्वारगुणान्विताहा
रमध्ये हि च कच्छपक बक्रमेके पुच्छभागे दक्षि
णे शफराकृतिः वामे प्रदपपने रेखा मत्स्य
मूर्तिः शुभप्रदेति पद्मपुराणे त्रयोर्म
त्स्यादयः प्रणामा हि चक्राः खोकसंयुताः
तेषां संदर्शनादेव सर्वान्कामानवाप्नुया
त् ग्रन्थान्तरे मत्स्याकृतिमुखाकारं मुखमे

प्र·
वृ·वि·
२२

दृश्यचक्रकम् श्रीवत्सबिंदुमालाढ्यम
त्स्यरूपंस्तंभेबिंदुरिति तथा नानावर्णै
युतंदीर्घंस्पष्टचक्रंतद्दक्षिणे वामेवा
मत्स्यसंयुक्तंमत्स्यंसर्वफलप्रदमिति ।
पुराणसंग्रहे बिंदुत्रयसमायुक्तंवामे
ऽङ्कंवाशंखलांछने दीर्घंचदक्षिणे
स्यंचमत्स्यंचक्रंसमीरितमिति श्यामे
दीर्घाचकाचवर्णाचबिंदुत्रयविभूषि
ता मत्स्याख्यासाशिलाश्रेयाभुक्तिमुक्ति
फलप्रदेति विश्वरहस्ये मत्स्यरूपेत
देवस्यदीर्घाकारंस्पष्टजिनम् बिंदुत्रय
समायुक्तंकृष्णवर्णंसशोभनम् इति
अत्रब्रह्मांडेकान्विचक्रासमविकृष्टता
मत्स्यमूर्तिंमुख्येनैवस्वीकार्यं इयमेव
द्विचक्रादिविकल्पमपुराणेस्तुन्यागो
णत्वेनस्वीकार्यो तथाग्रंथान्तरोक्तम
त्स्यमूर्तिद्वयंविचक्रस्थिकृष्णत्वेमेकचक्रं
गौणत्वेनस्वीकार्यं तत्रपृष्ठकपाले
दीनांद्वादशकपालस्तावकत्ववदेकादि
चक्रयोस्त्रिचक्रस्तावकत्वान्नप्रशस्तिया।

28

क्रमाच्चक्रत्वान्न प्रतिचक्रातिरिक्तैकच
क्रादिचक्राणां मूर्तिः स्वीकार्येति चेत्तैका
चक्रादिचक्रमूर्त्योरभावेन तद्देशक्रमेत
स्यैकचक्रे द्विचक्रत्वयोः कथं तस्याति।
विषयतापत्तेः तस्माद्वाक्यांतरानुरोधे
नोत्तमस्मध्यमाधमभावेन तिस्रोपि म।
त्स्यमूर्तयः स्वाकार्याः नन्वेवं ग्रामोऽत
निश्चक्रापि मत्स्यमूर्तिरतिरिक्ता भवति
ति चेन्न वाक्यांतरानुरोधाभावात् सा।
मान्यविधिरस्पष्टः संक्षिप्तेन विशेषत
इति न्यायात्तेन तस्याश्चक्रोपसंहारस्य
वोचितत्वात्सर्वोपसंहारन्यायेनोद्ध
योरेकस्य वाचकस्य पद्यासंभवे कार्यः
मात्स्यं चक्रेत्वन्न सर्वसाधारणे किंतु
त्प्रकरणसंग्रहोक्तलक्षणलक्षितं ग्रा
संप्रकरणगतसलक्षणस्य प्राबल्यात्
ग्रन्थापमपरो विशेषः चक्रसंख्यान्त
वदेका परिभाषाशास्त्रादिदंरूपादिनी
यातन्त्रप्रकरणगतसमान्यमूर्तिग्रा।
ग्रायथासामान्यरामम जौ द्विनसंख्यो

प्र.
वृ. वि.
२८

क्रान्तीयाचतन्नद्विशेषमूर्तिगताऽऽराणां
तरवाक्योयान्ना यथाश्रीराममूर्तौचनः
संख्योक्नौपवंसति कोदंडीऊरूदंडभः
शणामलोन्नन्नष्टष्टकः रेवोढयममाय
क्राहारयापौंधनधरः श्रीरामइतिवि।
ख्यातोभुक्तिमुक्तिफलप्रदइतिश्रीवाण
ह्योक्तश्रीरामह्योक्तश्रीराममूर्तौचक्रसंख्ये
नक्तेवसतिकावासंख्याग्रास्यानननाव।
दाया नस्यामूर्तिविशेषमनपेक्ष्यसप्रद
शवनस्मामान्यरूपत्वेसतिपंचदशावस्था।
करणागतमान्यमूर्तिगतविशेषरूप
नयावाधस्यैवोदितत्वात् प्रकृतोदा।
हरणेयद्यपिविरोधाभावेनवाधाप्रस
क्तिस्तथापिविरोधेयन्यायोद्रष्टव्यः
तस्मात्प्रकरणगतसामान्यमूर्तिगता
चक्रसंख्याग्राह्या नचापिकृतोदाहर।
णादाविषयमपिसंख्यासंभवति किंतु
पुराणांतर्गतमूर्तिविशेषस्यचसंख्या
याह्यामह्य प्रकरणापेतयापिचक्रप्र
माणादिवरत्वांतरप्रकरणस्यैवप्रावल्ये

त्. तस्मादन्तश्चक्रसंख्यादौ तन्नद्वान्तरप्रक
रणस्यैवशागतत्वरणेनगतिप्राप्तसंख्यादी
नां पूर्ववद्दपदानं तदभावे सामान्यमूर्तिग
तोपादानं तदभावे परिभाषाप्राप्तस्योपादा
नम्यमितिविभागः एतेन वर्णोक्तस्यादि
त्यपिव्याख्यातानि तन्नद्विचक्रैकचक्रमू
र्त्योर्वकुत्वलदान् तेन सङ्ख्येवं तद्विरुउ
द्विचक्रमूर्तेरवगौणत्वमितिचेत् तस्याध
नयोरवैरीणत्वमात्म्येगौरवस्यावश्यकल्प।
नीयत्वात् अन्यथागोदोहनेनेहत्याग।
योः पशुफलकत्वेनतुल्यत्वेनोद्भियाग
स्यसर्वथानर्थानप्रसंगापत्तेः तस्मात्सा
मान्यगौरवलाघवप्रयुक्तएवसंख्यो त
कल्पोनकिलयुक्तइति अयंप्रकारस्तु।
वक्ष्यमाणेतन्मूर्तिलक्षणेषुन्यस्ते।
स्यः विशेषंतत्रतत्रप्रदर्शयिष्यामइति
इतिमत्स्यमूर्तिलक्षणानिसमाप्तानि
अथकूर्ममूर्तिलक्षणानि पद्मपुराणे
कूर्मस्याकारचक्रांकाशिलाकूर्मःप्रकी
र्तितइति इदंचक्रलक्षणविशिष्टकूर्म।

ग्र.
कृ.वि.
२९

लक्षणंवोध्यं अस्मि कूर्मस्त्वपोन्नतःपृष्टे
वर्त्तुलावर्त्तशोभनः हरितेवर्णेमाधवे।
कौस्तुभेनचचिह्नितइति पुराणसंग्रहे
तन्नलक्षणसंपूर्त्तंभानोर्वलयपंचकम्
कूर्मरूपंसचक्रंचवंडुलेभेसर्वकामदमि
ति चिन्तारहस्ये कूर्मस्त्वपोन्नतःपृष्टेवर्त्त
लावर्त्तसंयुतः हरिद्वर्णःसमाख्यातःकौ
स्तुभेनैवचिह्नितइति २ पाशांकुशांकि
तंदेवंनीलवर्णंविशारदं कूर्मदेवंभज
न्नामयश्चलोक्यियमाप्नुयादिति २ इंद्र
नीलनिभाख्यलाग्निरेखोलांछितोतमा
कूर्ममूर्तिरवक्रोनाडुलेभासर्वकामदेति
३ कूर्मचक्रोद्भवंपृष्टेवर्त्तलावर्त्तशोभितं
सर्वकामप्रदंह्येयंसाक्षेसौभाग्यवर्धनमि
ति ४ यंतेमोदोमवेन्नसपूजकस्यनसं
शयः अन्यत्रापि कूर्मस्याडुन्नतशिराः
पृष्टभागेवरोन्नितः विख्यातोडुलेभः
सर्वमनोरथफलप्रदइति वाराहपुराणे
वर्त्तुलःकमठाकारोवनमालादिचक्र
वान् प्रणामाभोहेमविंदुश्चकूर्मस्तम्भ।

30

विठ्ठलेभरुति ग्रंथांतरे वर्तुलंपृष्ठमम्बुद
